# Shri Ramanusmritih

# શ્રીરામાનુસ્મૃતિઃ

## Document Information


Text title : Shri Ramanusmritih 06 20

File name : rAmAnusmRRitiH.itx

Category : raama

Location : doc_raama

Proofread by : Gopalakrishnan

Description/comments : From stotrArNavaH 06-20

Latest update : September 18, 2021

Send corrections to : Sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


September 19, 2021

*sanskritdocuments.org*

# શ્રીરામાનુસ્મૃતિઃ

બ્રહ્મોવાચ
વન્દે રામં જગદ્વન્દ્યં સુન્દરાસ્યં શુચિસ્મિતમ્ ।
કન્દર્પકોટિલાવણ્યં કામિતાર્થપ્રદાયકમ્ ॥ ૧॥

ભાસ્વત્કિરીટકટકકટિસૂત્રોપશોભિતમ્ ।
વિશાલલોચનં ભ્રાજત્તરુણારુણકુણ્ડલમ્ ॥ ૨॥

શ્રીવત્સકૌસ્તુભલસદ્વક્ષસં વનમાલિનમ્ ।
મુક્તાહારસુશોભાઢ્યં મુદ્રિકારત્નભાસુરમ્ ॥ ૩॥

સર્વાઙ્ગસુન્દરં હૃદ્યં દ્વિભુજં રઘુનન્દનમ્ ।
નીલજીમૂતસઙ્કાશં નીલાલકવૃતાનનમ્ ॥ ૪॥

જ્ઞાનમુદ્રાલસદ્વક્ષોબાહું જ્ઞાનમયં હરિમ્ ।
વામજાનૂપરિન્યસ્તવામહસ્તામ્બુજં પ્રભુમ્ ॥ ૫॥

વીરાસને સમાસીનં વિદ્યુત્પુઞ્જનિભામ્બરમ્ ।
કોટિસૂર્યપ્રતીકાશં કોમલાઙ્ગસમુજ્જ્વલમ્ ॥ ૬॥

જાનકીલક્ષ્મણાભ્યાં ચ વામદક્ષિણશોભિતમ્ ।
હનુમદ્રવિમુખ્યાદિકપિમુખ્યૈશ્ચ સેવિતમ્ ॥ ૭॥

દિવ્યરત્નસમાયુક્તસિંહાસનગતં પ્રભુમ્ ।
પ્રત્યહં પ્રાતરુત્થાય ધ્યાત્વૈવં રાઘવં હૃદિ ॥ ૮॥

એભિઃ ષોડશભિર્નામપદૈઃ સ્તુત્વા નમેદ્ધરિમ્ ।
ૐ નમો રામાય શુદ્ધાય બુદ્ધાય પરમાત્મને ॥ ૯॥

વિશુદ્ધજ્ઞાનદેહાય રઘુનાથાય તે નમઃ ।
નમો રાવણહન્ત્રે તે નમો વાલિવિનાશિને ॥ ૧૦॥

નમો વૈકુણ્ઠનાથાય નમો વિષ્ણુસ્વરૂપિણે ।

નમો યજ્ઞસ્વરૂપાય યજ્ઞભોક્ત્રે નમો નમઃ ॥ ૧૧॥

યોગિધ્યેયાય યોગાય પરમાનન્દરૂપિણે ।
શઙ્કરપ્રિયમિત્રાય જાનકીજાનયે નમઃ ॥ ૧૨॥

ય એવં પ્રાતરુત્થાય ભક્તિશ્રદ્ધાસમન્વિતઃ ।
ષોડશૈતાનિ નામાનિ રામચન્દ્રસ્ય નિત્યશઃ ॥ ૧૩॥

પઠેદ્વિદ્વાન્ સ્મરન્ રામં સ એવ સ્યાદ્રઘૂત્તમઃ ।
શ્રીરામે ભક્તિરચલા ભવત્યેવ હિ સર્વદા ॥ ૧૪॥

સમયે સમનુપ્રાપ્તે રાઘવઃ સીતયા સહ ।
હૃદિ સન્દૃશ્યતે તસ્ય સાક્ષાત્ સૌમિત્રિણા સહ ॥ ૧૫॥

નિત્યં ચાપરરાત્રેષુ રામસ્યૈતાં સત્યમાહિતઃ ।
મુચ્યતેઽનુસ્મૃતિં જપ્ત્વા મૃત્યુદારિદ્ર્યપાતકૈઃ ॥ ૧૬॥

ઇતિ બ્રહ્મપ્રોક્તં શ્રીરામાનુસ્મૃતિસ્તોત્રં સમ્પૂણમ્ ।

Proofread by Gopalakrishnan

*Shri Ramanusmritih*

pdf was typeset on September 19, 2021

Please send corrections to *sanskrit@cheerful.com*